स्थौल्ये दार्ढ्यं भवति तावत्येव कार्य्या । शिष्टाचाराद्विशेषो ज्ञेयः । पादस्तम्भावुदग्दक्षिणसंस्थानौ कृत्वा तुला प्राग्भारा कार्य्या । "पश्चिमे तोलयेत्कर्त्तॄन् अन्यस्मिन् मृत्तिकां शुभामिति" पितामहस्मरणात् । पूर्वपश्चिमसंस्थानौ कृत्वोदग्भारा वा कार्य्या । "धारयेदुत्तरे पार्श्वे पुरुषं दक्षिणे शिलामिति" नारदस्मरणात् । घटाङ्गत्वेन तोरणादिकं कार्य्यमित्याह पितामहः "तोरणे तु तथा कार्य्ये पार्श्वयोरुभयोरपि । घटादुच्चतरे स्यातान्नित्यन्दशभिरङ्गुलैः । अवलम्बौ तु कर्त्तव्यौ तोरणाभ्यामधोमुखौ । मृण्मयौ सूत्रसम्बद्धौ घटमस्तकचुम्बिनाविति" । घटारोहणमाह नारदः "शिक्यद्वयं समासज्य घटकर्कटयोर्दृढम् । एकशिक्ये तु पुरुषमन्यत्र तोलयेच्छिलाम्" । "धारयेदुत्तरे पार्श्वे पुरुषन्दक्षिणे शिलाम् । पिटकम्पूरयेत्तस्मिन्निष्टकापांशुलोष्टकैरिति" । इष्टकाभिर्ग्रावभिः पांशुभिर्लोष्टैर्वेत्यर्थः । माषराशिभिरपि पेटकम्पूरयेत् । "माषराशिमथापि वेति" स्मृत्यन्तरवचनात् । पितामहोऽपि "शिक्यद्वयं समासज्य पार्श्वयोरुभयोरपि । प्राङ्मुखान् कल्पयेद्दर्भांस्तत्र विप्रः समाहितः । पश्चिमे तोलयेत्कर्त्तॄनन्यस्मिन्मृत्तिकां शुभाम् । इष्टकाभस्मपाषाणकपालास्थिविवर्जितामिति" । अत्र इष्टकापाषाणयोर्वर्ज्यत्वोक्तिः समुच्चयनिराकरणार्था न तु विकल्पनिराकरणार्था पूर्वोदाहृतनारदवचने तयोरपि विधानात् । "एतेन मृत्तिकापाषाणादीनां सम्भूय तोलनकर्त्तृत्वमिति मतमपास्तम् । मृत्तिकाशिलेष्टकादीनामेकार्थत्वात् "तुल्यार्थास्तु विकल्पेरन्निति" न्यायेन विकल्प इति मिताक्षरायाम् । विष्णुरपि "अत्रैकशिक्ये पुरुषमारोपयेत् द्वितीये प्रतिमानं शिलादीति" । समतानिरीक्षणार्थं राज्ञा तद्विदो नियोक्तव्याः । तथा च पितामहः "परीक्षका नियोक्तव्यास्तुलामानविशारदाः । वणिजो हेमकाराश्च कांस्यकारास्तथैव चेति" । नियुक्ताश्च निरीक्षेरन्नित्याह नारदः । "सुवर्णकारा वणिजः कुशलाः कांस्यकारकाः । तान्तुलामन्ववेक्षेरन् तुलाधारणकोविदाः इति"। निरीक्षितं प्रत्याह पितामहः "कार्य्यः परीक्षकैर्नित्यमवलम्बात्र समो घटः । उदकञ्च प्रदातव्यं घटस्योपरि पण्डितैः । यस्मिन्न प्लवते तोयं स विज्ञेयः समो घटः" इति । अवलम्बसमः तोरणयोर्लम्बमानौ यौ मृण्मयाववलम्बौ तयोः समः । नारदोऽपि "प्रथमारोहणे प्राड्प्रमाणन्निपुणैः सह । तुलाशिरोभ्यान्तुल्यं तु तोरणस्य-स्तलक्षणमिति" । तोलनानन्तरं कर्त्तव्यम्पितामह आह "तोलयित्वा नरं पूर्वं पश्चात्तमवतार्य्य तु । घटं तु कारयेन्नित्यं पताकाध्वजशोभितम्" । तत आवाहयेद्देवान्विधिनानेन मन्त्रवित् । वादित्रतूर्य्यनिर्घोषैर्गन्धमाल्यानुलेपनैः । प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवेकस्ततो वदेत्" इति । विवादानुरूपं प्रश्नम्पृच्छतीति प्राट् तद्विवेचयतीति विवेकः प्राट् चासौ विवेकश्च प्राड्विवेकः । ततोऽभियुक्तं तोलयित्वाऽवतार्य्य धर्म्मावाहनादारभ्याभियुक्तशिरसि पत्रबन्धनान्तं साधारणविधिं कुर्य्यात् । घटपूजायाङ्गन्धादिविशेषन्नारद आह "रक्तैर्गन्धैश्च माल्यैश्च दध्यपूपाक्षतादिभिः । अर्च्चयेत्तु घटं पूर्वं ततः शिष्टांस्तु पूजयेदिति" । शिष्टानवशिष्टानिन्द्रादीन् । पत्रबन्धनानन्तरं मन्त्रयेत् प्राड्विवेक इत्याह पितामहः "घटमामन्त्रयेच्चैव विधिनानेन शास्त्रवित्" । विधिना मन्त्रेण शास्त्रवित्प्राड्विवेकः । मन्त्रश्च तेनैव दर्शितः" "त्वं घट ! ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम् । धकाराद्धर्म्ममूर्त्तिस्त्वं टकारात् कुटिलं नरम् । धृतो धारयसे यस्माद्घटस्तेनाभिधीयसे । त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च । त्वमेव देव ! जानीषे न विदुर्य्यानि मानवाः । व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छतीति" । शोध्यस्याभिमन्त्रणञ्चाह याज्ञवल्क्यः "तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः । प्रतिमानसमीभूतो रेखां कृत्वाऽवतारितः । त्वन्तुले ! सत्यधामासि पुरा देवैर्विनिर्म्मिता । तत्सत्यं वद कल्याणि ! संशयान्मां विमोचय । यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय । शुद्धश्चेद्गमयोर्द्ध्वं मां तुलामित्यभिमन्त्रयेदिति" । तुलाश्रितः तुलामारूढः । प्रतिमानसमीभूतः प्रतिमानेन मृदादिना समीकृतः । रेखां कृत्वावतारणे साम्यचिह्नं कृत्वा अभिमन्त्रणमेवावतारणानन्तरं कार्य्यम् अवतारित इति तद्दर्शनात्ततः प्राड्विवेकः तुलाधारकं शपथैर्नियम्य शिरोगतपत्रकं पुनर्घटमारोपयेत् । अतएव नारदः "समयैः परिबध्याथ पुनरारोपयेन्नरम् । निवाते दृष्टिरहिते शिरस्यारोप्य पत्रकमिति" । समयैः शपथैः परिबध्य नियम्य । ते च विष्णुना दर्शिताः । "ब्रह्मघ्नो ये स्मृता लोकाः ये लोकाः कूटसाक्षिणः । तुलाधारस्य ते लोकास्तुलान्धारयतो मृषेति" पुनरारोहणकालेऽभि-